# Trivenistotram

# ત્રિવેણીસ્તોત્રમ્

## Document Information

Text title : triveNIdashakastotram

File name : triveNIstotram.itx

Category : devii, devI, nadI, shankarAchArya, dashaka

Location : doc_devii

Author : Shankaracharya

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ત્રિવેણીસ્તોત્રમ્

મુક્તામયાલઙ્કૃતમુદ્રવેણી ભક્તાભયત્રાણસુબદ્ધવેણી ।
મત્તાલિગુઞ્જન્મકરન્દવેણી શ્રીમત્પ્રયાગે જયતિ ત્રિવેણી ॥ ૧॥

લોકત્રયૈશ્વર્યનિદાનવેણી તાપત્રયોચ્ચાટનબદ્ધવેણી ।
ધર્માઽર્થકામાકલનૈકવેણી શ્રીમત્પ્રયાગે જયતિ ત્રિવેણી ॥ ૨॥

મુક્તાઙ્ગનામોહન-સિદ્ધવેણી ભક્તાન્તરાનન્દ-સુબોધવેણી ।
વૃત્ત્યન્તરોદ્વેગવિવેકવેણી શ્રીમત્પ્રયાગે જયતિ ત્રિવેણી ॥ ૩॥

દુગ્ધોદધિસ્ફૂર્જસુભદ્રવેણી નીલાભ્રશોભાલલિતા ચ વેણી ।
સ્વર્ણપ્રભાભાસુરમધ્યવેણી શ્રીમત્પ્રયાગે જયતિ ત્રિવેણી ॥ ૪॥

વિશ્વેશ્વરોત્તુઙ્ગકપર્દિવેણી વિરિઞ્ચિવિષ્ણુપ્રણતૈકવેણી ।
ત્રયીપુરાણા સુરસાર્ધવેણી શ્રીમત્પ્રયાગે જયતિ ત્રિવેણી ॥ ૫॥

માઙ્ગલ્યસમ્પત્તિસમૃદ્ધવેણી માત્રાન્તરન્યસ્તનિદાનવેણી ।
પરમ્પરાપાતકહારિવેણી શ્રીમત્પ્રયાગે જયતિ ત્રિવેણી ॥ ૬॥

નિમજ્જદુન્મજ્જમનુષ્યવેણી ત્રયોદયોભાગ્યવિવેકવેણી ।
વિમુક્તજન્માવિભવૈકવેણી શ્રીમત્પ્રયાગે જયતિ ત્રિવેણી ॥ ૭॥

સૌન્દર્યવેણી સુરસાર્ધવેણી માધુર્યવેણી મહનીયવેણી ।
રત્નૈકવેણી રમણીયવેણી શ્રીમત્પ્રયાગે જયતિ ત્રિવેણી ॥ ૮॥

સારસ્વતાકાર-વિઘાતવેણી કાલિન્દકન્યામયલક્ષ્યવેણી ।
ભાગીરથીરૂપ-મહેશવેણી શ્રીમત્પ્રયાગે જયતિ ત્રિવેણી ॥ ૯॥

શ્રીમદ્ભવાનીભવનૈકવેણી લક્ષ્મીસરસ્વત્યભિમાનવેણી ।
માતા ત્રિવેણી ત્રયીરત્નવેણી શ્રીમત્પ્રયાગે જયતિ ત્રિવેણી ॥ ૧૦॥

ત્રિવેણીદશકં સ્તોત્રં પ્રાતર્નિત્યં પઠેન્નરઃ ।
તસ્ય વેણી પ્રસન્ના સ્યાદ્ વિષ્ણુલોકં સ ગચ્છતિ ॥ ૧૧॥

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં ત્રિવેણીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Trivenistotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*